# Shri Pratyangira Sahasranamavali 967 Names

# श्रीप्रत्यङ्गिरासहस्रनामावलिः

## Document Information

Text title : Pratyangira SahasranAmavali 967 names

File name : pratyangirAsahasranAmAvaliH.itx

Category : sahasranAmAvalI, devii, dashamahAvidyA, devI, nAmAvalI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : See corresponding stotra.

Source : shrIrudrayAmale tantre dashavidyA rahasye

Latest update : July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# श्रीप्रत्यङ्गिरासहस्रनामावलिः

ईश्वर उवाच ।
शृणु देवि प्रवक्ष्यामि साम्प्रतं त्वत्पुरःसरम् ।
सहस्रनाम परमं प्रत्यङ्गिरासुसिद्धये ॥

सहस्रनामपाठे यः सर्वत्र विजयी भवेत् ।
पराभवो न चास्यास्ति सभायां वासने रणे ॥

तथा तुष्टा भवेद्देवी प्रत्यङ्गिरास्य पाठतः ।
यथा भवति देवेशि साधकः शिव एव हि ॥

अश्वमेधसहस्राणि वाजपेयस्य कोटयः ।
सकृत्पाठेन जायन्ते प्रसन्ना यत्परा भवेत् ॥

भैरवोऽस्य ऋषिश्छन्दोऽनुष्टुप् देवि समीरिता ।
प्रत्यङ्गिरा विनियोगः स्यात्सर्वसम्पत्ति हेतवे ॥

सर्वकार्येषु संसिद्धिः सर्वसम्पत्तिदा भवेत् ।
एवं ध्यात्वा पठेद्देवीं यदीछेदात्मनो हितम् ॥

अथ ध्यानम् ।
आशाम्बरा मुक्तकचा घनच्छविर्ध्येया सचर्मासिकरा विभूषणा ।
दंष्ट्रोग्रवक्त्रा ग्रसिताहिता त्वया प्रत्यङ्गिरा शङ्करतेजसेरिता ॥

ॐ अस्य श्रीप्रत्यङ्गिरासहस्रनाममहामन्त्रस्य,
भैरव ऋषिः, अनुष्टुप् छन्दः, श्रीप्रत्यङ्गिरा देवता,
ह्रीं बीजं, श्रीं शक्तिः, स्वाहा कीलकं
मम सर्वकार्यसिद्ध्यर्थे विद्यासिद्ध्यर्थे नामपारायणे विनियोगः ।

अथ नामावलिः ।
ॐ देव्यै । प्रत्यङ्गिरायै । सेव्यायै । शिरसायै । शशिशेखरायै ।
समाऽसमायै । धर्मिण्यै । समस्तसुरशेमुष्यै । सर्वसम्पत्तिजनन्यै ।

समदायै । सिन्धुसेविन्यै । शम्भुसीमन्तिन्यै । सोमाराध्यायै ।
वसुधारसायै । रसायै । रसवत्यै । वेलायै । वन्यायै । वनमालिन्यै ।
वनजाक्ष्यै नमः । २०

ॐ वनचर्यै नमः । वन्यै । वनविनोदिन्यै । वेगिन्यै । वेगदायै ।
वेगबलायै । स्थानबलाधिकायै । कलायै । कलाप्रियायै । कौल्यै ।
कोमलायै । कालकामिन्यै । कमलायै । कमलास्यायै । कमलस्थायै ।
कलावत्यै । कुलीनायै । कुटिलायै । कान्तायै । कोकिलायै नमः । ४०

ॐ कुलभाषिण्यै नमः । कीरकेल्यै । कलायै । काल्यै । कपालिन्यै ।
कालिकायै । केशिन्यै । कुशावर्तायै । कौशाम्ब्यै । केशवप्रियायै ।
काश्यै । काशापहायै । कांशीसङ्काशायै । केशदायिन्यै । कुण्डल्यै ।
कुण्डलीस्थायै । कुण्डलाङ्गदमण्डितायै । कुशापाश्यै । कुमुदिन्यै ।
कुमुदप्रीतिवर्धिन्यै नमः । ६०

ॐ कुन्दप्रियायै नमः । कुन्दरुच्यै । कुरङ्गमदमोदिन्यै ।
कुरङ्गनयनायै । कुन्दायै । कुरुवृन्दाभिनन्दिन्यै । कुसुम्भकुसुमायै ।
किञ्चित्क्वणत्किङ्किणिकायै । कटवे । कठोरायै । करणायै । कण्ठायै ।
कौमुद्यै । कम्बुकण्ठिन्यै । कपर्दिन्यै । कपटिन्यै । कठिन्यै ।
कालकण्ठिकायै । किब्रुहस्तायै । कुमार्यै नमः । ८०

ॐ कुरुन्दायै नमः । कुसुमप्रियायै । कुञ्जरस्थायै । कुञ्जरतायै ।
कुम्भिकुम्भस्तनद्वयायै । कुम्भिकायै । करभोरवे । कदलीदलशालिन्यै ।
कुपितायै । कोटरस्थायै । कङ्काल्यै । कन्दशेखरायै ।
एकान्तवासिन्यै । किञ्चित्कम्पमानशिरोरुहायै । कादम्बर्यै ।
कदम्बस्थायै । कुङ्कुम्यै । प्रेमधारिण्यै । कुटुम्बिन्यै ।
प्रियायुक्तायै नमः । १००

ॐ क्रतवे नमः । क्रतुकर्यै । क्रियायै । कात्यायन्यै । कृत्तिकायै ।
कार्तिकेयप्रवर्त्तिन्यै । कामपत्न्यै । कामधात्र्यै । कामेश्यै ।
कामवन्दितायै । कामरूपायै । कामगत्यै । कामाक्ष्यै । काममोहितायै ।
खड्गिन्यै । खेचर्यै । खञ्जायै । खञ्जरीटेक्षणायै । खलायै ।
खरगायै नमः । १२०

ॐ खरनासायै नमः । खरास्यायै । खेलनप्रियायै । खरांशवे ।
खेटिन्यै । खरखद्वाङ्गधारिण्यै । खलखण्डिन्यै । विख्यात्यै ।

खण्डितायै । खण्डव्यै । स्थिरायै । खण्डप्रियायै । खण्डखाद्यायै ।
सेन्दुखण्डायै । खञ्जन्यै । गङ्गायै । गोदावर्यै । गौर्यै ।
गोमत्यै । गौतम्यै नमः । १४०

ॐ गयायै नमः । गवे । गज्यै । गगनायै । गारुड्यै । गरुडध्वजायै ।
गीतायै । गीतप्रियायै । गोत्रायै । गोत्रक्षयकर्यै । गदायै ।
गिरिभूपालदुहितायै । गोगायै । गोकुलवर्धिन्यै । घनस्तन्यै ।
घनरुचये । घनोरवे । घननिःस्वनायै । घूत्कारिण्यै ।
घूतकर्यै नमः । १६०

ॐ घुघूकपरिवारितायै नमः । घण्टानादप्रियायै । घण्टायै ।
घनायै । घोटप्रवाहिन्यै । घोररूपायै । घोरायै । घूनीप्रीत्यै ।
घनाञ्जन्यै । घृताच्यै । घनमुष्ट्यै । घटायै । घण्टायै ।
घटामृतायै । घटास्यायै । घटानादायै । घातपातनिवारिण्यै ।
चञ्चरीकायै । चकोर्यै । चामुण्डायै नमः । १८०

ॐ चीरधारिण्यै नमः । चातुर्यै । चपलायै । चारवे । चलायै ।
चेलायै । चलाचलायै । चतवे । चिरन्तनायै । चाकायै । चियायै ।
चामीकरच्छव्यै । चापिन्यै । चपलायै । चम्पवे । चित्तचिन्तामण्यै ।
चितायै । चातुर्वर्ण्यमय्यै । चञ्चचौरायै ।
चापचमत्कृत्यै नमः । २००

ॐ चक्रवर्त्यै नमः । वधवे । चक्रायै । चक्राङ्गायै ।
चक्रमोदिन्यै । चेतश्चर्यै । चित्तवृत्त्यै । चेतायै ।
चेतनाप्रदायै । चाम्पेय्यै । चम्पकप्रीत्यै । चण्ड्यै ।
चण्डालवासिन्यै । चिरञ्जीवितदाचित्तायै । तरुमूलनिवासिन्यै ।
छुरिकायै । छत्रमध्यस्थायै । छिद्रायै । छेदकर्यै ।
छिदायै नमः । २२०

ॐ छुच्छुन्दरीपलप्रीत्यै नमः । छुन्दरीभनिभस्वनायै । छलिन्यै ।
छलवच्छिन्नायै । छिटिकायै । छेककृते । छद्मिन्यै । छान्दस्यै ।
छायायै । छायाकृते । छादये । जयायै । जयदायै । जात्यै ।
जृम्भिन्यै । जामलायुतायै । जयापुष्पप्रियायै । जायायै । जाप्यायै ।
जाप्यजगज्जन्यै नमः । २४०

ॐ जम्बूप्रियायै नमः । जयस्थायै । जङ्गमायै । जङ्गमप्रियायै ।

जन्तवे । जन्तुप्रधानायै । जरत्कर्णायै । जरद्गवायै । जातीप्रियायै ।
जीवनस्थायै । जीमूतसदृशच्छवये । जन्यायै । जनहितायै ।
जायायै । जम्भजम्भिलशालिन्यै । जवदायै । जववद्वाहायै । जमान्यै ।
ज्वरहायै । ज्वर्यै नमः । २६०

ॐ झञ्झानीलमय्यै नमः । झञ्झाझणत्कारकराचलायै ।
झिंटीशायै । झस्यकृते । झम्पायै । यमत्रासनिवारिण्यै ।
टङ्कारस्थायै । टङ्कधरायै । टङ्कारकारणायै । टस्यै । ठकुरायै ।
ठीकृत्यै । ठिण्ठीरवसनावृतायै । ठण्ठानीलमय्यै । ठण्ठायै ।
ठणत्कारकरायै । ठसायै । डाकिन्यै । डामरायै ।
डिण्डिमध्वनिनादिन्यै नमः । २८०

ॐ ढक्काप्रियस्वनायै नमः । ढक्कायै । तपिन्यै । तापिन्यै । तरुण्यै ।
तुन्दिलायै । तुन्दायै । तामस्यै । तपःप्रियायै । ताम्रायै । ताम्राम्बरायै ।
ताल्यै । तालीदलविभूषणायै । तुरङ्गायै । त्वरितायै । तोतायै ।
तोतलायै । तादिन्यै । तुलायै । तापत्रयहरायै नमः । ३००

ॐ तारायै नमः । तालकेश्यै । तमालिन्यै । तमालदलवच्छायायै ।
तालस्वनवत्यै । तम्यै । तामस्यै । तमिस्रायै । तीव्रायै ।
तीव्रपराक्रमायै । तटस्थायै । तिलतैलाक्तायै । तारिण्यै ।
तपनद्युत्यै । तिलोत्तमायै । तिलककृते । तारकाधीशशेखरायै ।
तिलपुष्पप्रियायै । तारायै । तारकेशकुटुम्बिन्यै नमः । ३२०

ॐ स्थाणुपत्न्यै नमः । स्थितिकर्यै । स्थलस्थायै । स्थलवर्धिन्यै ।
स्थित्यै । स्थैर्यायै । स्थविष्ठायै । स्थावत्यै । स्थूलविग्रहायै ।
दन्तिन्यै । दण्डिन्यै । दीनायै । दरिद्रायै । दीनवत्सलायै । देव्यै ।
देववध्वै । दैत्यदमिन्यै । दन्तभूषणायै । दयावत्यै ।
दमवत्यै नमः । ३४०

ॐ दमदायै नमः । दाडिमस्तन्यै । दन्दशूकनिभायै । दैत्यदारिण्यै ।
देवताऽऽननायै । दोलाक्रीडायै । दयालवे । दम्पत्यै । देवतामय्यै ।
दशायै । दीपस्थितायै । दोषायै । दोषहायै । दोषकारिण्यै । दुर्गायै ।
दुर्गार्तिशमन्यै । दुर्गमायै । दुर्गवासिन्यै । दुर्गन्धनाशिन्यै ।
दुःस्थायै नमः । ३६०

ॐ दुःस्वप्नशमकारिण्यै नमः । दुर्वारायै । दुन्दुभिध्वानायै ।

दूरगायै । दूरवासिन्यै । दरदायै । दरहायै । दात्र्यै । दयादायै ।
दुहितायै । दशायै । धुरन्धरायै । धुरीणायै । धौरेय्यै ।
धनदायिन्यै । धीरायै । अधीरायै । धरित्र्यै । धर्मदायै ।
धीरमानसायै नमः । ३८०

ॐ धनुर्धरायै नमः । धर्मिन्यै । धूर्तायै । धूर्तपरिग्रहायै ।
धूमवर्णायै । धूमपानायै । धूमलायै । धूममोदिन्यै । नलिन्यै ।
नन्दन्यै । नन्दानन्दिन्यै । नन्दबालिकायै । नवीनायै । नर्मदायै ।
नर्म्यै । नेम्यै । नियमनिश्चयायै । निर्मलायै । निगमाचरायै ।
निम्नगायै नमः । ४००

ॐ नग्निकायै नमः । निम्यै । नालायै । निरन्तरायै । निघ्न्यै ।
निर्लेपायै । निर्गुणायै । नत्यै । नीलग्रीवायै । निरीहायै ।
निरञ्जनजन्यै । नव्यै । नवनीतप्रियायै । नार्यै । नरकार्णवतारिण्यै ।
नारायण्यै । निराकारायै । निपुणायै । निपुणप्रियायै । निशायै नमः । ४२०

ॐ निद्रायै नमः । नरेन्द्रस्थायै । नमितायै । नमिताप्यै ।
निर्गुण्डिकायै । निर्गुण्डायै । निर्मांसायै । नासिकाभिधायै । पताकिन्यै ।
पताकायै । पलप्रीत्यै । यशश्विन्यै । पीनायै । पीनस्तनायै ।
पत्न्यै । पवनाशनशायिन्यै । परायै । परायैकलायै । पाकायै ।
पाककृत्यरत्यै नमः । ४४०

ॐ प्रियायै नमः । पवनस्थायै । सुपवनायै । तापस्यै ।
प्रीतिवर्धिन्यै । पशुवृद्धिकर्यै । पुष्ट्यै । पोषण्यै ।
पुष्पवर्धिन्यै । पुष्पिण्यै । पुस्तककरायै । पुन्नागतलवासिन्यै ।
पुरन्दरप्रियायै । प्रीत्यै । पुरमार्गनिवासिन्यै । पेशायै । पाशकरायै ।
पाशबन्धहायै । पांशुलायै । पशवे नमः । ४६०

ॐ पटायै नमः । पटाशायै । परशुधारिण्यै । पाशिन्यै । पापघ्न्यै ।
पतिपत्न्यै । पतिता । अपतितायै । पिशाच्यै । पिशाचघ्न्यै ।
पिशिताशनतोषितायै । पानदायै । पानपात्रायै । पानदानकरोद्यतायै ।
पेषायै । प्रसिद्ध्यै । पीयूषायै । पूर्णायै । पूर्णमनोरथायै ।
पतद्गर्भायै नमः । ४८०

ॐ पतद्गात्रायै नमः । पौनःपुण्यै । पुरायै । पङ्किलायै ।
पङ्कमग्नायै । पामीपायै । पञ्जरस्थितायै । पञ्चमायै ।

पञ्चयामायै । पञ्चतायै । पञ्चमप्रियायै । पञ्चमुद्रायै ।
पुण्डरीकायै । पिङ्गलायै । पिङ्गलोचनायै । प्रियङ्गुमञ्जर्यै ।
पिण्ड्यै । पण्डितायै । पाण्डुरप्रभायै । प्रेतासनायै नमः । ५००

ॐ प्रियालुस्थायै नमः । पाण्डुघ्न्यै । पीतसापहायै । फलिन्यै ।
फलदात्र्यै । फलश्र्यै । फणिभूषणायै । फूत्कारकारिण्यै ।
स्फारायै । फुल्लायै । फुल्लाम्बुजासनायै । फिरङ्गहायै ।
स्फीतमत्यै । स्फित्यै । स्फीतिकर्यै । वनमायायै । बलारात्यै ।
बलिन्यै । बलवर्धिन्यै । वेणुवाद्यायै नमः । ५२०

ॐ वनचर्यै नमः । वीरायै । बीजमय्यै । विद्यायै । विद्याप्रदायै ।
विद्याबोधिन्यै । वेददायिन्यै । बुधमात्रे । बुद्धायै । वनमालावत्यै ।
वरायै । वरदायै । वारुण्यै । वीणायै । वीणावादनतत्परायै ।
विनोदिन्यै । विनोदस्थायै । वैष्णव्यै । विष्णुवल्लभायै ।
विद्यायै नमः । ५४०

ॐ वैद्यचिकित्सायै नमः । विवशायै । विश्वविश्रुतायै । वितन्द्रायै ।
विह्वलायै । वेलायै । विरावायै । विरत्यै । वरायै । विविधार्ककरायै ।
वीरायै । बिम्बोष्ठ्यै । बिम्बवत्सलायै । विन्ध्यस्थायै । वीरवन्द्यायै ।
वर्यै । यानपरायै । विदे । वेदान्तवेद्यायै । वैद्यायै नमः । ५६०

ॐ वेदस्य विजयप्रदायै नमः । विरोधवर्धिन्यै । वन्ध्यायै ।
वन्ध्याबन्धनिवारिण्यै । भगिन्यै । भगमालायै । भवान्यै ।
भयभाविन्यै । भीमायै । भीमाननायै । भैम्यै । भङ्गुरायै ।
भीमदर्शनायै । भिल्ल्यै । भल्लधरायै । भीरवे । भेरुण्ड्यै ।
भिये । भयापहायै । भगसर्पिण्यै नमः । ५८०

ॐ भगायै नमः । भगरूपायै । भगालयायै । भगासनायै ।
भगामोदायै । भेरीभङ्कारञ्जिन्यै । भीषणायै । भीषणारावायै ।
भगवत्यै । भूषणायै । भारद्वाज्यै । भोगदात्र्यै । भवघ्न्यै ।
भूतिभूषणायै । भूतिदायै । भूमिदात्र्यै । भूपतित्वप्रदायिन्यै ।
भ्रमर्यै । भ्रामर्यै । नीलायै नमः । ६००

ॐ भूपालमुकुटस्थितायै नमः । मत्तायै । मनोहरमनायै । मानिन्यै ।
मोहन्यै । मह्यै । महालक्ष्म्यै । मदक्षीबायै । मदीयायै ।
मदिरालयायै । मदोद्धतायै । मतङ्गस्थायै । माधव्यै । मधुमादिन्यै ।

मेधायै । मेधाकर्यै । मेध्यायै । मध्यायै । मध्यवयस्थितायै ।
मद्यपायै नमः । ६२०

ॐ मांसलायै नमः । मत्स्यमोदिन्यै । मैथुनोद्धतायै । मुद्रायै ।
मुद्रावत्यै । मात्रे । मायायै । महिममन्दिरायै । महामायायै ।
महाविद्यायै । महामार्यै । महेश्वर्यै । महादेववध्वै ।
मान्यायै । मधुरायै । वीरमण्डलायै । मेदस्विन्यै । मीलदश्रिये ।
महिषासुरमर्दिन्यै । मण्डपस्थायै नमः । ६४०

ॐ मठस्थायै नमः । मदिरागमगर्वितायै । मोक्षदायै । मुण्डमालायै ।
मालायै । मालाविलासिन्यै । मातङ्गिन्यै । मातङ्ग्यै । मतङ्गतनयायै ।
मधुस्रवायै । मधुरसायै । मधूककुसुमप्रियायै । यामिन्यै ।
यामिनीनाथभूषायै । यावकरञ्जितायै । यवाङ्कुरप्रियायै । मायायै ।
यवन्यै । यवनाधिपायै । यमघ्न्यै नमः । ६६०

ॐ यमकन्यायै नमः । यजमानस्वरूपिण्यै । यज्ञायै । यज्वायै ।
यजुर्यज्वायै । यशोनिकरकारिण्यै । यज्ञसूत्रप्रदायै । ज्येष्ठायै ।
यज्ञकर्मकर्यै । यशस्विन्यै । यकारस्थायै । यूपस्तम्भनिवासिन्यै ।
रञ्जितायै । राजपत्न्यै । रमायै । रेखायै । रवेरण्यै । रजोवत्यै ।
रजश्चित्रायै । रजन्यै नमः । ६८०

ॐ रजनीपत्यै नमः । रागिण्यै । राज्यन्यै । राज्यायै । राज्यदायै ।
राज्यवर्धिन्यै । राजन्वत्यै । राजनीत्यै । रजतवासिन्यै । रमण्यै ।
रमणीयायै । रामायै । रामावत्यै । रत्यै । रेतोवत्यै । रतोत्साहायै ।
रोगहृते । रोगकारिण्यै । रङ्गायै । रङ्गवत्यै नमः । ७००

ॐ रागायै नमः । रागज्ञायै । रागकृते । रणायै । रञ्जिकायै ।
अरञ्जिकायै । रञ्जायै । रञ्जिन्यै । रक्तलोचनायै ।
रक्तचर्मधरायै । रञ्जायै । रक्तस्थायै । रक्तवादिन्यै । रम्भायै ।
रम्भाफलप्रीत्यै । रम्भोरवे । राघवप्रियायै । रङ्गभृते ।
रङ्गमधुरायै । रोदस्यै नमः । ७२०

ॐ रोदसीग्रहायै नमः । रोधकृते । रोधहन्त्र्यै । रोगभृते ।
रोगशायिन्यै । वन्द्यै । वदिस्तुतायै । बन्धायै । बन्धूककुसुमाधरायै ।
वन्दीत्रायै । वन्दितायै । मात्रे । विन्दुरायै । वैन्दव्यै । विधायै ।
विङ्क्यै । विङ्कपलायै । विङ्कायै । विङ्कस्थायै ।

विङ्कवत्सलायै नमः । ७४०

ॐ वद्यै नमः । विलग्नायै । विप्रायै । विध्यै । विधिकर्यै । विधायै ।
शङ्खिन्यै । शङ्खवलयायै । शङ्खमालावत्यै । शम्यै ।
शङ्खपात्राशिन्यै । शङ्खायै । अशङ्खायै । शङ्खगलायै ।
शश्यै । शंव्यै । शरावत्यै । श्यामायै । श्यामाङ्ग्यै ।
श्यामलोचनायै नमः । ७६०

ॐ श्मशानस्थायै नमः । श्मशानायै । श्मशानस्थलभूषणायै ।
शमदायै । शमहन्त्र्यै । शाकिन्यै । शङ्कुशेखरायै । शान्त्यै ।
शान्तिप्रदायै । शेषायै । शेषस्थायै । शेषदायिन्यै । शेमुष्यै ।
शोषिण्यै । शीर्यै । शौर्यै । शौर्यायै । शरायै । शिर्यै ।
शापहायै नमः । ७८०

ॐ शापहानीशायै नमः । शम्पायै । शपथदायिन्यै । शृङ्गिण्यै ।
शृङ्गपलभुजे । शङ्कर्यै । ईशङ्कर्यै । शङ्कायै ।
शङ्कापहायै । संस्थायै । शाश्वत्यै । शीतलायै । शिवायै ।
शिवस्थायै । शवभुक्तायै । शववर्णायै । शिवोदर्यै । शायिन्यै ।
शावशयनायै । शिंशपायै नमः । ८००

ॐ शिशुपालिन्यै नमः । शवकुण्डलिन्यै । शैवायै । शङ्करायै ।
शिशिरायै । शिरायै । शवकाञ्च्यै । शवश्रीकायै । शवमालायै ।
शवाकृत्यै । शयन्यै । शङ्कुवायै । शक्त्यै । शन्तनवे ।
शीलदायिन्यै । सिन्धवे । सरस्वत्यै । सिन्धुसुन्दर्यै । सुन्दराननायै ।
साध्वै नमः । ८२०

ॐ सिद्ध्यै नमः । सिद्धिदात्र्यै । सिद्धायै । सिद्धसरस्वत्यै ।
सन्तत्यै । सम्पदायै । सम्पदे । संविदे । सरतिदायिन्यै । सपत्न्यै ।
सरसायै । सारायै । सरस्वतिकर्यै । स्वधायै । सरःसमायै ।
समानायै । समाराध्यायै । समस्तदायै । समिद्धायै । समदायै नमः । ८४०

ॐ सम्मायै नमः । सम्मोहायै । समदर्शनायै । समित्यै । समिधायै ।
सीमायै । सवित्र्यै । सविधायै । सत्यै । सवतायै । सवनादारायै ।
सावनायै । समरायै । सम्यै । सिमिरायै । सततायै । साध्व्यै ।
सध्रीच्यै । सहायिन्यै । हंस्यै नमः । ८६०

ॐ हंसगत्यै नमः । हंसायै । हंसोज्ज्वलनिचोलुयुजे । हलिन्यै ।

हलदायै । हालायै । हरश्रियायै । हरवल्लभायै । हेलायै ।
हेलावत्यै । हेषायै । ह्वेषस्थायै । ह्वेषवर्धिन्यै । हन्तायै ।
हन्तायै । हतायै । हत्यायै । हाहन्ततापहारिण्यै । हङ्कार्यै ।
हन्तकृते नमः । ८८०

ॐ हङ्कायै नमः । हीहायै । हातायै । हताहतायै । हेमप्रदायै ।
हंसवत्यै । हार्यै । हातरिसम्मतायै । होर्यै । होत्र्यै । होलिकायै ।
होमायै । होमाय । हविषे । हरये । हारिण्यै । हरिणीनेत्रायै ।
हिमाचलनिवासिन्यै । लम्बोदर्यै । लम्बकर्णायै नमः । ९००

ॐ लम्बिकायै नमः । लम्बविग्रहायै । लीलायै । लोलावत्यै । लोलायै ।
ललन्यै । लालितायै । लतायै var लोकायै । ललामलोचनायै ।
लोच्यायै । लोलाक्ष्यै । लक्षणायै । ललायै । लम्पत्यै । लुम्पत्यै ।
लम्पायै । लोपामुद्रायै । ललन्तिन्यै । लन्तिकायै । लम्बिकायै नमः । ९२०

ॐ लम्बायै नमः । लघिमायै । लघुमध्यमायै । लघीयस्यै ।
लघुदर्य्यै । लूतायै । लूतानिवारिण्यै । लोमभृते । लोम्ने । लोप्तायै ।
लुलुत्यै । लुलुसंयत्यै । लुलायस्थायै । लहर्यै । लङ्कापुरपुरन्दर्यै ।
लक्ष्म्यै । लक्ष्मीप्रदायै । लक्ष्म्यायै । लक्षायै ।
बलमतिप्रदायै नमः । ९४०

ॐ क्षुण्णायै नमः । क्षुपायै । क्षणायै । क्षीणायै । क्षमायै ।
क्षान्त्यै । क्षणावत्यै । क्षामायै । क्षामोदर्यै । क्षीमायै ।
क्षौमभृते । क्षत्रियाङ्गनायै । क्षयायै । क्षयकर्यै ।
क्षीरायै । क्षीरदायै । क्षीरसागरायै । क्षेमङ्कर्यै । क्षयकर्यै ।
क्षयदायै नमः । ९६०

ॐ क्षणदायै नमः । क्षत्यै । क्षुरन्त्यै । क्षुद्रिकायै । क्षुद्रायै ।
क्षुत्क्षामायै । क्षरपातकायै नमः । ९६७

This appears incomplete with 967 names as found
in the corresponding sahasranAmastotram.
See the stotra for phalashrutiH.

Proofread by PSA Easwaran

*Shri Pratyangira Sahasranamavali 967 Names*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*